শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী শঙ্করাচার্য ৱিরচিতম্
॥শ্রী কৃষ্ণাষ্টকম্ ॥

This document has been prepared by*

Sunder Kidambi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

॥শ্রী কৃষ্ণাষ্টকম্ ॥

শ্রিযা শ্লিষ্টো ৱিষ্ণুঃ স্থিরচররূপুর্ৱেদৱিষযো
ধিযাং সাক্ষী শুদ্ধো হরিরসুরহন্তাঞ্জনযনঃ।
গদী শঙ্খী চক্রী ৱিমলৱনমালী স্থিররুচিঃ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ১ ॥

যতঃ সর্ৱং জাতং ৱিযদনিলমুখ্যং জগদিদং
স্থিতৌ নিঃশেষং যোৱতি নিজসুখাংশেন মধুহা।
লযে সর্ৱং স্বস্মিন্ হরতি কলযা যস্তু স ৱিভুঃ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ২ ॥

অসূনাযম্যাদৌ যমনিযমমুখ্যৈঃ সুকরণৈঃ
নিরুধ্যেদং চিত্তং হৃদি ৱিলযমানীয সকলম্।
যমীড্যং পশ্যন্তি প্রৱরমতযো মাযিনমসৌ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ৩ ॥

পৃথিব্যাং তিষ্ঠন্ যো যমযতি মহীং ৱেদ ন ধরা
যমিত্যাদৌ ৱেদো ৱদতি জগতামীশমমলম্।
নিযন্তারং ধ্যেযং মুনিসুরনৃণাং মোক্ষদমসৌ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ৪ ॥

মহেন্দ্রাদির্দেৱো জযতি দিতিজান্ যস্য বলতো
ন কস্য স্বাতন্ত্র্যং ক্বচিদপি কৃতৌ যতকৃতিমৃতে।
কৱিত্বাদের্গর্ৱং পরিহরতি যোসৌ ৱিজযিনঃ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ৫ ॥

ৱিনা যস্য ধ্যানং ব্রজতি পশুতাং সূকরমুখাং
ৱিনা যস্য জ্ঞানং জনিমৃতিভযং যাতি জনতা।
ৱিনা যস্য স্মৃত্যা কৃমিশতজনিং যাতি স ৱিভুঃ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ৬ ॥

www.bharati.com

নরাতঙ্কোত্তঙ্কঃ শরণশরণো ভ্রান্তিহরণো
ঘনশ্যামো ৱামো ব্রজশিশুৱযস্যোর্জুনসখঃ।
স্বযম্ভূর্ভূতানাং জনক উচিতাচারসুখদঃ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ৭ ॥

যদা ধর্মগ্লানির্ভৱতি জগতাং ক্ষোভকরণী
তদা লোকস্বামী প্রকটিতৱপুঃ সেতুধৃগজঃ।
সতাং ধাতা স্বচ্ছো নিগমগণগীতো ব্রজপতিঃ
শরণ্যো লোকেশো মম ভৱতু কৃষ্ণোক্ষিৱিষযঃ॥ ৮ ॥

ইতি হরিরখিলাত্মারাধিতঃ শঙ্করেণ
শ্রুতিৱিশদগুণোসৌ মাতৃমোক্ষার্থমাদ্যঃ।
যতিৱরনিকটে শ্রীযুক্ত আৱির্বভূৱ
স্বগুণৱৃত উদারঃ শঙ্খচক্রাব্জহস্তঃ॥ ৯ ॥

॥ইতি শ্রী কৃষ্ণাষ্টকম্ সমাপ্তম্॥

www.prapatti.com